ङ्कितो भवेत् । पृथ्वीवराहनाम्नी१६ सा या वराहाकृतिः शिला । स्थालग्ना चैव रेखैका गतराज्यप्रदायिका । मत्स्याख्या१७ सा शिला ज्ञेया बिन्दुत्रयविभूषिता । कांस्यद्वारा स्वर्णनिभा दीर्घा सा भुक्तिमुक्तिदा । कूर्माख्या१८ तु शिला पृष्ठे वर्त्तुला चोन्नता भवेत् । हरितं वर्णमायाता कौस्तुभेन च चिह्निता । शिलाकूर्म१९ स विज्ञेयः कूर्माकारस्तु यो भवेत् । चक्राङ्किता तथा वृत्ता पूजिता सा पदप्रदा । हयग्रीवो२०ऽङ्कुशाकारो रेखा चक्रसमीपगा । बहुबिन्दुसमायुक्तं पृष्ठं नीरदनीलभम् । ज्ञेयः सौम्यहयग्रीवो२१ हयग्रीवासमा शिला । दीर्घया लेखया युक्ता रेखा वा तादृशी भवेत् । हयशीर्षः२२ स विज्ञेयो मुखं यस्य हयाकृति । पद्माकृति भवेद्वापि साक्षमालं शिरस्तथा । वैकुण्ठ२३स्तित्वर्णाभश्चक्रमेकं तथा ध्वजम् । द्वारोपरि तथा रेखा पुष्पाकारा सुशोभना । श्रीधरस्तु२४ तथा देवश्चिह्नितो वनमालया । कदम्बकुसुमाकारो रेखा पञ्चकभूषितः । वामनः२५ स तु विज्ञेयो योऽतिह्रस्वश्च वर्त्तुलः । अतसीकुसुमप्रख्यो बिन्दुनोपरिशोभितः । दधिवामननामा२६ तु ऊर्द्ध्वाधश्चक्रसंयुतः । महाद्युतिरतिह्रस्वः सुभिक्षक्षेमदायकः । सुदर्शन२७स्तथा देवः श्यामवर्णो महाद्युतिः । वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे । सहस्रार्जुननामा२८ऽसौ नानारेखामयो भवेत् । चक्राकारा यन्त्रपङ्क्तिः स नष्टद्रव्यदायकः । स्थूलदामोदरो२९ यस्य मध्ये चक्रं प्रतिष्ठितम् । दूर्वाभो द्वारसंकीर्णः पीतरेखो धनप्रदः । राधादामोदरो३० ज्ञेय ऊर्द्ध्वाधश्चक्रवद्बिलम् । नातिदीर्घमुखं मध्ये लम्बरेखा स भोगदः । दामोदरः३१ स विज्ञेयो यश्चक्रद्वयलाञ्छितः । स्थूलं भवेच्चावयवं पूजितः सुखदः सदा । अनन्तो३२ बहुवर्णः स्यान्नागभोगेन चिह्नितः । अनेकचक्रसंभिन्नः सर्वकामफलप्रदः । पुरुषोत्तमनामा३३ऽसौ यस्य दिक्षु विदिक्षु च । ऊर्द्ध्वान्यासानि द्वयप्रान्ते पुरुषार्थफलप्रदः । योगेश्वरः३४ स विज्ञेयो चिह्नं यस्य शिरोगतम् । ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः । पद्मनाभ३५स्तथा रक्तः पङ्कजच्छत्रसंयुतः । तुलस्या पूजितो नित्यं दरिद्रस्त्वीश्वरो भवेत् । रविप्रकाशो हिरण्याक्ष३६श्चन्द्राभः स्फटिकोपमः । अथ वा जायते नानास्वर्णरेखाभिरङ्कितः । गरुड़ः३७ स तु विज्ञेयो मध्ये पद्मद्वयान्विते । कुटीर्घां द्वयप्रान्ते रेखा स

सर्पविघ्ननाशकः । जनार्दनः३८ स विज्ञेयः केवलानि स्फुटानि च । यस्योदरे तु चक्राणि चत्वारि पितृतृप्तिकृत् । लक्ष्मीनारायणो३९ ज्ञेयो वनमालाङ्कितोदरः । स्थूलद्वारश्चतुश्चक्रो भुक्तिमुक्तिप्रदायकः । हृषीकेशः४० स विज्ञेयो योऽर्द्धचन्द्राकृतिर्भवेत् । तमभ्यर्च्य लभेत् स्वर्गं विषयांश्च मनोहितान् । लक्ष्मीनरहरि४१र्ज्ञेयः कृष्णवर्णः सबिन्दुकः । वामपार्श्वे समे चक्रे गृहस्थाभीष्टदायकः । त्रिविक्रमस्तु४२ विज्ञेयः श्यामवर्णो महाद्युतिः । वामपार्श्वे चक्रयुग्ममेकरेखा तु दक्षिणे । कृष्णो४३ ज्ञेयः शिला कृष्णा सचक्रा वा विचक्रिका । प्रदक्षिणावर्त्तकृतवनमालाविभूषिता । चतुर्मुखः४४ स विज्ञेयो द्वे चक्रे मध्यदेशतः । चतस्रः पार्श्वगा रेखा वेदशास्त्रागमप्रदः" मेरुतं० । शिवादिशिलाभेदास्तत्रैवोक्ता यथा शिवोक्तिः "शालग्रामा मत्स्वरूपाः शृणु तेषान्तु लक्षणम् । यत्सेवनाद्भवेदिष्टमिह लोके परत्र च । शिवनाभः१ स विज्ञेयः सलिङ्गाकारतां गतः । स्वयम्भुलिङ्गाकृतिमान् मन्त्रसिद्धिविधायकः । त्र्यम्बकः२ स तु विज्ञेयो बिन्दुत्रयविभूषितः । शूलाकारा तथा रेखा गतपुंस्त्वप्रदायकः । धूर्जटिः३ स तु विज्ञेयो यत्र रेखा जटासमा । तिस्रो यत्र प्रदृश्यन्ते सोऽर्च्चितो ज्ञानदायकः । शम्भुस्तु४ पाण्डुरो ज्ञेयो बिन्दुः कृष्णस्तु मस्तके । बिल्वप्रमाणस्तेजस्वी पूजितः श्रीशङ्करः । ईश्वरः५ स तु विज्ञेयो रक्तो बिन्दुस्तु मस्तके । एकचक्रो द्विचक्रो वाभ्यन्तरेऽपश्च गोष्पदम् । मृत्युञ्जयः६ स विज्ञेयस्त्वपमृत्युविनाशकः । अधश्चक्रं तदूर्द्ध्वं च श्वेता रेखा त्रिशूलवान् । चन्द्रशेखर७नामाऽसावर्द्धचन्द्राकृतिस्तु के । मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनम् । रुद्रः८ स एव विज्ञेयः कपिलो मूर्द्ध्नि लक्षितः । चक्रमध्ये भवेद्रेखा नाशयेद्रिपुसन्ततिम्" । "शालग्रामानथो वक्ष्ये शक्तिकीटसमुद्भवान् । येषां पूजनतो देवी भवानी सुप्रसीदति । श्रीविद्या१ सा तत्रे चक्रमूर्द्ध्वे कृतं प्रदश्यते । वाह्ये घण्टाङ्कितो मूर्द्धा स्निग्धा श्यामाखिलेष्टदा । महाकाली२ तु सा ज्ञेया योनिचिह्नसमन्विता । द्विच्छिद्राढ्या सर्वशिला त्रिकोणेनाङ्किता च या । यदायुधाकृतिश्चोर्द्ध्वं तां देवीं तत्र निर्दिशेत् । देवीशिला सचक्रा या दक्षमार्गेण तां यजेत् । सार्च्चिता वाममार्गेण लोकद्वयसुखावहा । या चक्ररहिता देवीशिलां तां वामतोऽर्च्चयेत्" ।